No. १५६३

Title कारकव्यूहः कारकपरिच्छेदः

Author रुद्रभट्टाचार्यः

Extent २१ Age x

Subject न्याय शास्त्र

कारकव्यूहः कारकपरिच्छेदो वा

१५७२

२१ पत्र

पत्र ४१

का॰ वा॰
१

श्रीगुरुगणेशायनमः॥ ॥चित्तेचिंतामणिमिवराधारमणंतमाधाय॥श्रीरुद्रोतिद्रुरुहविं
रचयत्येषकारकव्यूहं॥ ॥विभक्त्यर्थद्वाराक्रियान्वयिसत्क्रियानिमित्तंकारकं॥राज्ञःपुरु
षोगच्छतीत्यत्रगमनप्रयोजकस्यराज्ञोवारणायक्रियान्वयित्वांतं॥तत्रसाक्षात्क्रियान्व
यित्वंनग्रामादेश्वरंपरयानदन्वयित्वाद्यन्वयित्वरूपयाअन्वयित्वंराज्ञोप्यस्ति॥अतोवि
भक्त्यर्थद्वारेति॥संबंधस्यतुनक्रियायामन्वयः॥संबंधप्रकारकबोधेनामजन्योपस्थि
तेहेतुत्वात्॥ अतएवसंबंधिनोनकारकत्वं॥केचित्तु॥क्रियान्वयित्वांतंनोपादेयंआज्ञा
द्वाराराज्ञोगमनहेतुत्वेकारकत्वमिष्टमेव॥राज्ञःपुरुषोगच्छतीत्यत्रतस्यनकारकत

हरः
१

याप्रतीतिस्तद्बोधकपदाभावादित्याहुः॥ तण्डुलपक्तेत्यत्रषष्ठ्याः कर्मत्वेवालक्षणान तस्मारितद्धि
तीयार्थोवाकर्मत्वंउभयथापितण्डुलस्यकर्मत्वमस्त्येव॥ ननुसंप्रदानेपादानेवाव्याप्तिष्ठातयोर्दी
नेपतनेचविनिभिन्नत्वात्॥ इतिचेन्न॥ परस्वत्वफलकत्यागविशेषोहिदानंतत्रविशेषणंपरस्व
त्वांशेहेतुतयासंप्रदानस्यकारकत्वात्॥ स्वीकारस्यस्वत्वहेतुत्वात्॥ स्वीकारपदार्थपर्यालो
चनेनापितद्धेतुत्वप्राप्तेर्विभागफलकत्वेसत्यधःसंयोगफलकक्रियाहिपतनं॥ तत्रविभागां
शहेतुतयाअपादानस्यकारकत्वात्॥ यथाउत्तरसंयोगनिभिन्नतयासंयोगफलकक्रियात्म
कगमननिभिन्नत्वंग्रामस्येत्यस्मात्पितत्वरणाः॥ अनुमतिद्वारानतुज्ञापनद्वारासंप्रदानस्य

का.वा.
२

क्रियानिमित्तत्वं ॥ मिश्रादयस्तु ॥ अत्र कार्यपदं क्रियापदं घटस्य कर्त्तेति व्यवहारात् ॥ एवं च ॥ का
रणत्वमेव लक्षणं क्रियापदस्यैव यत्कार्यस्य कारणं तत्कारकमिति स्फोरणाय नव्यानां तु
द्रव्यसंयोगादावतिव्याप्तिः ॥ तस्य फलायोगव्यवच्छिन्नतया कारणत्वेन कारकत्वेनेष्टत्वात् ॥
वस्तुतो वक्ष्यमाणं षडन्यतमत्वं कारकत्वं ॥ तेन संप्रदानाद्यव्याप्तिर्न ॥ न चावयवरूपादाव
वयवीरूपकारणे वक्ष्यमाणेषु लक्षणाभाववत्यतिव्याप्तिरिति प्राहुः ॥ तत्र कृत्याश्रयः कर्ता
तदुपादानविषयकतदनुकूलकृत्याश्रयस्तत्कर्त्ता ॥ अन्यविषयात् तदनुकूलां कृतिमादायापि
न कर्तृत्वव्यवहारः ॥ अत एव मन्त्रोऽभूतं न तु मया कृतमिति व्यपदेशः ॥ अत एवाकामकृते

हरः
२

करणत्वमात्रंनकर्तृत्वमितिप्रायश्चित्ताईदमुक्तंतन्नद्वारणायत्तदुपादानविषयकेति॥ह
विरादिगोचरकृतिस्वर्गकर्त्तेत्यव्यवहारात्तदुपादानेति।आमवातस्यकृतिसत्त्वेपिक्रिया
भावान्नकर्तृत्वमतस्तदनुकूलेति॥यद्वाशंखादिवादकेशब्दकर्तृत्वव्यवहारात्तदुपादान
पदमधिष्ठानपरं॥केचित्तु॥तद्विषयकतदनुकूलकृतिमत्वंतत्कर्तृत्वं॥अत्रचोद्देश्यत्वव्या
वृत्तंविषयत्वंतेनपाककृतेःसुखोद्देश्यकत्वेपितयाकृत्यानसुखकर्तृत्वंचैत्रादेरित्याहुः
॥पूर्वकल्पेचैत्रादेर्नसुखंकर्तुंतदुपादानाविषयत्वात्॥ईश्वरःप्रवतीष्टमेव॥कार्यता
वच्छिन्नजन्यतानिरूपितभिन्नाधानुकूलताग्राह्या॥क्रियाश्रयःकर्त्तेतिवैयाकरणाः॥

का·वा·
३

3

यगाद्यसमभिव्याहृतेन तद्धातूत्तराख्यातेन यद्धात्वर्थान्वितो यो धर्मो बोध्यते तत्त्वमेव
तत्क्रियाकर्तृत्वं ॥ गच्छतीत्यादौ गमनीयव्यापारवान् जानातीत्यादौ ज्ञानाश्रयस्तथा एवमन्य
तेत्याहुः ॥ तन्नाभिधीयते कुशूल इत्यादौ कर्मकर्तरि कर्तृत्वाभावापत्तेः यगाद्यसमभिव्याहाराभा
वात् ॥ घटस्तिष्ठतीत्यादौ क्रियाभिन्नत्वाभावात् कारके निव्याप्तेः ॥ कर्मत्वं न कारकजन्यक्रि
यानुकूलव्यापारत्वं हस्तव्यापार्ये दात्रेऽतिव्याप्तेः ॥ किंतु परसमवेतक्रियाजन्यफलशालि
त्वं न तादृशधात्वर्थतावच्छेदकफलशालित्वं वा चैत्र आत्मानं गच्छतीत्यादिवारणाय परस
मवेतेति तच्च द्वितीयाद्यर्थः ॥ द्वितीयाप्रकृत्यार्थापेक्षपरत्वं बोध्यते ॥ गम्यते ग्राम इत्यादौ

हरः
३

तिङर्थफलाश्रयापेक्षिकमिन्नविशेषानवपरत्वंभिन्नरूपंद्वितीयाद्यर्थस्तन्तद्वैत्राद्यवन्वेति
वाच्यं॥द्वितीयाद्यर्थप्रकारकबोधेधातुजन्योपस्थितेर्हेतुत्वात्॥अन्यथाग्राममैत्रइतिअ
त्रापिग्राममिन्नसंयोगवानितिप्रत्ययापत्तेः॥चैत्रीयआत्मानंचैत्रंगच्छतीतिप्रत्ययापत्तेश्च
नवत्वन्मतेपिचैत्रआत्मानंगच्छतीतिप्रत्ययापत्तिः॥आकाशंगच्छतीतिवदिष्टापत्तेः॥ए
वंसतिचैत्रेणग्रामंगम्यतेइत्यत्रचैत्रस्यतिङर्थपरत्वविशेषणतयाअन्वयायोग्यत्वस्य
प्रथमांतपदानुपस्थाप्यत्वादितिकेचित्॥विस्तरंत्वाख्यातवादविवरणेग्राह्यः॥द्रव्यग्र
हणंविनास्वस्वत्वध्वंसावच्छिन्नपरस्वत्वोत्पत्तिफलकत्यागोहिदानं॥देवतोद्देश्यकस्वस

का.वा.
४
5

त्वध्वंसहेतुव्यापारे प्रयोगः॥ स्वस्वत्वाग्निसंयोगहेतुघृतादिक्रियाप्रयोजनोदनादिव्यापाराव
च्छिन्नो वा होमः॥ विप्राय धनं ददातीत्यस्य विप्रोद्देश्यकधनकर्मकदानानुकूलअरुनिमानित्य
र्थः॥ अग्नौ जुहुयादित्यत्र वृत्तिः साक्षात्परंपरया सम्बन्धो बोध्यते सा च होमे अन्वयति॥ नत्व
ग्निसंयोगस्यैकदेशत्वात् अग्निसंयोगोग्निवृत्तिरिति अन्वयासंभवाद्॥ साक्षाद्धात्वर्थताव
च्छेदकस्तेन वह्निसंयोगमादाय न वह्नेः कर्मत्वं तादृशव्यापारस्यैव साक्षाद्धात्वर्थे प्रकारा
त् अतो वह्निं जुहोतीति आदिर्न प्रयोगः॥ होमार्थ जुहोतिसमभिव्याहृतद्वितीयायाश्चाग्निसं
योगहेतुक्रियाविशेष्यकबोध्यत्वकार्यतावच्छेदक अतादृश प्रयोगः॥ अधिकमग्रे वक्ष्यते

हरः
४

घृतं जुहोतीत्यत्र अग्निसंयोगहेतुक्रियानुकूलव्यापारो धात्वर्थः तावच्छेदकीभूतो द्वितीयार्थः तत्
दाश्रयता घृतं कर्म ॥ अग्निसंयोगत्वेन घृतोग्निसंयोगएव ता[illegible]त्पर्यवशाद्भासते ॥ तथाच ॥
घृतवृत्तितादृशव्यापारानुकूलकृतिमानितदर्थः ॥ जुहोतेरग्निसंयोगादेरखण्डशक्तिपक्षे
वृत्तिरेव द्वितीयार्थोग्निसंयोगेन्वयतीति प्राञ्चः ॥ रुद्रं यजत इत्यत्र रुद्रोद्देश्यकयागानुकूल
कृतिमानित्यर्थः ॥ दानजन्यस्वत्वहेतुः स्वीकारः प्रतिग्रहः ॥ गां प्रतिगृह्णातीत्यत्र स्वत्वं द्वितीयार्थः
॥ गोवृत्तिस्वत्वहेतुर्यो दानजन्यस्वत्वहेतुस्वीकारस्तद्वानित्यर्थः ॥ वृत्तिर्द्वितीयार्थः ॥ प्रतिग्रहे
कदेशे स्वत्वेन्वेतीति कश्चित् ॥ नवाधः संयोगक्रियानुकूलपतनं न संयोगश्च भूतले प्रसक्तौ

का·वा·
५
5

निपर्णी भूतलं पततीति प्रयोगः स्यादिति वाच्यं इष्टत्वात्॥ एवं नरकं पतितः नरके पतित इत्या
दयः प्रयोगाः ग्रामं गच्छतीति भूतले पततीत्यपि क्वचित् प्रयोगः॥ यत्तु॥ पतिः कर्मक एव कर्तृ
भिन्नान्वयिफलावच्छिन्नव्यापारबोधकस्यैव सकर्मकत्वात्॥ पतेश्च पर्णगताधः संयोगस्यैव बो
धकत्वात्॥ न च भूतले गताधः संयोगस्येति तन्नरकं पतित इत्यादौ द्वितीयासमासविधाना
त् इत्यस्मद्गुरवः॥ पतिः सकर्मक एव किन्तु गुरुत्वजन्यविजातीयक्रियैव तदर्थस्तत्समभि
व्याहृतद्वितीयादि त्वधः संयोगलक्षणं कर्मत्वमाह॥ एवं त्यजिगमिप्रभृतेरपि व्यापारस्
वार्थे न तु फलावच्छिन्ने गौरवात् सकर्मकत्वव्यवहारस्त्वननुगतस्तत्तन्निमित्तकः॥ त्यजिग

हरः
५

मिसमभिव्याहृतद्वितीयादिस्त्व यथायोग्यं विभागसंयोगलक्षणं कर्मत्वमाह॥गम्यादिसमभि
व्याहारेण तथैव तात्पर्यग्रहणात् परसमवेतत्त्वद्धात्वर्थान्वितशालित्वं तत्त्वद्धात्वर्थकर्मत्वं ते
पूर्वदेशादौ न गम्यादेः कर्मत्वमिति तत्त्वसत्ति संभवे सकर्मकत्वादिव्यवहारस्याननुगतनिमि
त्तकत्वायोगात्॥अपादानस्यकर्मणो ग्रामादेरध८पतनादिनिमित्तत्वाभावे कारकत्वायो
गात्॥त्यजतिगच्छतीत्यनयोस्तुल्यबोधकत्वात्॥एतेश्च नतयोर्लक्षणयोर्विभागावच्छिन्नव्या
पारबोधकत्वादेवन तुल्यबोधकत्वसामग्रीसमत्वेन शक्यात्तन्न बोधकत्वसंभवात्॥कर्मत्वं
त्रिविधं॥प्राप्यं क्रियाजन्यसंयोगशालिग्रामादि विकार्यं क्रियाजन्यारम्भकसंयोगनाशानुकू

लविभागशालितासदृशनाशशालिवाद्द्वाच्छिनत्तीत्यादौ वृक्षादिवृक्षपदस्य तदवयवेलाक्षणि
कत्वात्॥छेदनं चारम्भकसंयोगनाशविभागप्रयोजककुठारादिव्यापारः॥एवं च वृक्षावयववृत्ति
नाशविभागहेतुव्यापारानुकूलकृतिमानिति तद्बोधः॥प्राप्यविकार्ययोस्तादृशफलाश्रयत्वा
न्मुख्यकर्मत्वं क्रियैकदेशस्यनिमित्तत्वादेव क्रियानिमित्तत्वलक्षणं कारकत्वमपि निर्वर्त्यमुदा
ह्री यथा घटं करोतीत्यत्र घटादि अत्र घटादेस्तादृशफलानाश्रयत्वान्मुख्यकर्मत्वं क्रियानिमि
त्तत्वाभावान्मुख्यकारकत्वमपि किंतु साध्यतारव्यविषयत्वं रूपं गौणं तत्तद्धातुसमभिव्या
हृतिमन्नद्वितीयादिस्मृतादृशीमेव विषयतामाह॥ अतः कपालस्य कृतिविषयत्वेऽपि कपाल

करोतीतिनप्रयोगः॥ अंचस्तु घटंकरोतीत्यादौ घटपदंकपालेरक्षणिकं तेनक्रियाजन्यघटात्मक
फलशालित्वं कर्मत्वं कपालावच्छिन्नेसिद्धस्यकपालादे४ कृतिनिमित्तत्वाकारकत्वमपिनचस
र्वेकपालंकरोतीतिशतस्याप्रयोगः स्यात्करोतिसमभिव्याहृतघटादिपदस्यावयवेपिरू
ढलाक्षणिकत्वादित्याहुः॥ तत्रेदंचिंत्यं॥ घटंकरोतीत्यादौ घटस्यनिर्वर्त्यत्वमात्रंनकारक
त्वेवीरगस्यकारकत्वमात्रंननिर्वर्त्यत्वंतथानिर्वर्त्यकर्मत्वेकर्ममात्रेगतत्वात्कर्मलक्षणमे
पि॥ तद्दंत्यजतीत्यादौक्रियाजन्यफलशालित्वंवृक्षादौप्राप्यविकार्यनिर्वर्त्यभिन्नेतिव्याप्तिः॥
नचक्रियाजन्यविभागशालित्वमेवविकार्यवृक्षंत्यजतीत्यादौसर्वविकार्येतिव्याप्तिः॥ तस्मा

दुत्पाद्यत्वमेव निर्वर्त्यत्वं उत्पाद्यं।।प्राप्याद्यन्यतमत्वं कर्मत्वं।।अत एव ग्रामं गच्छतीत्यादावकार
स्यापि कर्मता कारकलक्षणं तु न कारणत्वगर्भंश८।।किंतु कर्माद्यन्यतमत्वं नवैवं विक्लित्तिं पच
तिसंयोगं गच्छतीत्यपि स्यात्।।विक्लित्यादेर्निर्वर्त्यकर्मत्वादिवाच्यो।।त्वन्मतेपि कटं करोतीति व
त् विक्लित्तिं पचतीत्यादि किं न स्यात्।।तथाविवक्षाविरहान्न तथेति चेत्तुल्यं।।प्रकृतेपि विका
र्यत्वं च।।क्रियाजन्यविकाराश्रयत्वं विकारश्चान्यथाभावस्तन्निष्ठः।।तथा च क्रियाजन्यभाव
विरोधिधर्मान्तरवत्वं।।ग्रामं गच्छतीत्यादौ संयोगादेः प्रागभावविरोधित्वेपि भावाविरोधित्वा
न्नातिव्याप्तिः।।तण्डुलान् पचतीति सुवर्णं कुण्डलं करोमीत्यादौ पूर्वसंस्थानविरोधिविक्लित्या

दिभागतयाविकार्यत्वं· ओदनंपचतिकटंकरोतिइत्यादौतु· ओदनादिनिष्ठयावविरोधिधर्मा
जननान्नाविकार्यता किंतुनिर्वर्त्यतैव वृक्षंत्यजतीत्यादौविभागस्यपूर्वसंयोगविरोधित्वाद्वि
कार्यतैव· आज्यंपुनातीत्यादौअवकरनिवासकत्वेनविकार्यता इत्यन्निविकारान्यफलशा
लिप्राप्यस्यैवंचफलत्रैविध्यात्कर्मत्रैविध्यं॥ उक्तकर्मद्वयभिन्नंकर्मप्राप्यंइतिफलितं।नतु
क्रियाजन्यसंयोगशालित्वंतत्त्वंशरंपचतीत्यादावतिव्याप्तेः॥ क्रियानुकूलव्यापारानोदना
दिरेवमोटनंतज्जन्यक्रियात्मकफलशालित्वेनशरस्यकर्मत्वात्॥ क्रियायाएवतत्रद्विती
यार्थत्वात्॥ शालीन्वहंतिशाकूनग्रामंतीत्यादौलौकिकेपिव्रीहीन्वहंतिव्रीहीन्प्रोक्षती

का॰वा॰
८
8

त्यादौवैतुष्यजलसंयोगभागितयायथायथंविकार्यत्वंप्राप्यकर्मत्वंसंस्काररूपफलभागितया
संस्कार्यव्यवहारइतिवदंति ओदनंपचतीत्यादौ ओदनपदस्यतण्डुलेविशेषिकमभेतुनदव
यवलक्षणा॥पाकस्यविक्लित्तिफलकोवह्निसंयोगः विक्लित्तिश्चावयवानांप्रशिथिलःसंयोग
ःसचपरंपरयातण्डुलेस्तीतितस्यप्राप्यकर्मता॥इत्यन्येक्रियाविशेषणेतुद्वितीयासाध
त्वार्थेद्विकर्मकेनिहादौकथंग्रामादेःकर्मत्वंनीहौधात्वर्थफलस्यगमनग्रामादावसत्वादि
तिचेन्न।सकर्मकक्रियांतरघटितांहिद्विकर्मकेत्युच्यते॥यथागमनानुकूलव्यापारोनीधात्व
र्थविभागहेतुर्यःक्रियानुकूलव्यापारोदोहनः।सचगोस्तननिष्पीडनादिः॥अजांग्रामंन

हरः
८

यतीत्यत्रनीधात्वर्थजन्यफलगमनशालितयाऽजाकर्मकगमनजन्यफलशालितयाग्रामःक
र्मअतएवधात्वर्थेसाक्षात्प्रतिकारीभूतफलाश्रयोऽजादिप्रधानंकर्मपरंपरयातादृशफल
आश्रयतयाग्रामादिकंतुगौणं।अतःप्रधानंकर्मआख्यातेनउच्यते॥अतएवाजाग्रामंनीय
तइतिप्रयोगः॥अजांग्रामंनयतीत्यत्रप्रथमद्वितीयार्थोगमनंचरमद्वितीयार्थःसंयोग
ः।तथाचग्रामीयसंयोगहेत्वजानिष्ठगमनानुकूलानयनविषयकृतिमानित्यर्थः॥दुह
धातोरप्येतद्रीत्याप्रधानंकर्मपयःगौणंगवादिकं।अत्रचकर्माख्यातेनगौणंकर्मोच्यते
दुहादेर्गौणकंकर्मनिरहादेःप्राधानिकमितिप्रामाणिकवचनात्॥अतएवगौःपयोदु

का.वा.
९

धेत इति प्रयोगः॥ गां पयो दोग्धीत्यत्र प्रथमद्वितीयार्थयोर्न विभागः परमद्वितीयार्थःस्वीदः
न्तथाप्यगोविभागहेतुः पयःक्रियानुकूलदोहनविषयकत्वमित्यर्थः॥ फलावच्छिन्नं व्या
पारवत्कारणं वा करणं॥ न चात्ममनःसंयोगद्वारात्मनोपि करणत्वापत्तिरितीष्टत्वात्॥
मूल एवात्मानमात्मना वेत्तीत्यादयः प्रयोगाः कर्तृत्वकरणत्वोपाधेर्भेदस्योभयात्मक
त्वेप्यदोषात्॥ श्रावणप्रत्यक्षे कर्णशष्कुलीसंयोगः स्रोत्रमनःसंयोगो वा व्यापारो वा न
शब्दः शब्दात्पत्त्यभावः प्रत्यक्षे व्यभिचारात्॥ प्रांचस्तु॥ कारकांतरे आचरितार्थत्वे सति
क्रियानिमित्तत्वं करणत्वं॥ तत्र चरितार्थत्वं च न व्यापारानुत्पाद्यफलहेतुत्वं कर्ता कुठा

हरः
९

रेणेप्सितार्थस्तद्व्यापारमुत्पाद्यफलहेतुत्वात्॥ कर्मापि कारणेनेप्सितार्थकर्मणः कु
ठारादेः कुठारव्यापारसंयोगादिहेतुत्वात्॥ अधिकरणमपि कर्तृकर्मान्यतरव्यापार
द्वारा क्रियाहेतुः॥ गृहे चैत्रः पचतीत्यत्र गृहस्य चैत्रनिष्ठव्यापारद्वारा॥ स्थाल्यां पचती
त्यत्र स्थाल्यास्तण्डुलीयव्यापारद्वारा हेतुत्वात्॥ तदुक्तं॥ कर्तृकर्मव्यवहितामसाक्षात्
कारयेत्क्रियां॥ उपकुर्वन्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतं॥ संप्रदानमनुमतिप्रकाशने
न कर्तरीच्छानिष्पत्तिद्वारा॥ अपादानं पर्णादिपतनप्रतिबंधकसंयोगनाशकविभागद्वा
राक्रियाहेतुः॥ संप्रदानापादानयोस्तु न सकलक्रियानिमित्तत्वमित्यप्यमेतदित्याहुः॥

का॰वा॰
१०
/0

नछिंत्यं॥ करणस्य कुठारस्यापि काष्ठरूपकर्मवृत्तिव्यापारजनकत्वात् कर्मणाचनित्यार्थत्वा
पत्तेः॥ दारुकुठारसंयोगमुत्पाद्य दारुस्ववशितार्थं न कुठार इत्यपूर्वावाचोयुक्तिः॥ अपादानेति
व्याप्तिश्च॥ तस्य कारकांतरव्यापारजनकत्वात्॥ केचित्तु॥ फलानुकूलकर्तृव्यापारवत्त्वं लक्षणं
कर्तृव्यापारविषयत्वमेव कर्तृत्वं॥ तृतीयार्थोपि तदेव॥ परशुनेत्यादावपि छिदामादिरूप
तादृशव्यापारस्य परशुनिष्ठत्वात्॥ कर्तृव्यापारश्च कृतिजन्यो व्यापार इति विशेषणादेयं
इदं तु करणत्वं नानुमानादिसाधारणं करणशब्दस्य नानार्थ इत्याहुस्तच्छिंत्य॥ काष्ठं छिनत्ती
त्यादौ कर्मणोपि संयोगादिलक्षणो कर्तृव्यापारत्वात्॥ अ टाभिस्तापसमित्यत्र तु वैशिष्ट्यतन्ती

हरः
१०

यार्थो न करणत्वं ॥ केचित्तु ॥ जटाभिरित्यत्रोपलक्षणत्वं तृतीयार्थः ॥ तज्ञ्ज्याप्यत्वसमनियतत्वे स
ति तत्समानाधिकरणत्वं ॥ न च जटावोध्यतापसव्याप्तिसमनियता तत्समनियतधर्मबोधकप
दोत्तरं तृतीयानेष्यत एव ॥ तेन शैत्येन जलं इत्यादयः प्रयोगा इत्याहुः ॥ अक्ष्णा काण इत्यत्रापि
वैशिष्ट्यं तृतीयार्थः ॥ करणत्वं च प्रकृतेः ॥ चक्षुष्मत्गोलकद्वयशून्यत्वेन ज्ञानं धसाधारणं ॥ अ
तोऽक्ष्णोति तथा च चक्षुर्विशिष्टचक्षुष्मत्गोलकद्वयशून्य इति अक्ष्णा काण इत्यस्यार्थः ॥
अन्यत्र केवलकाणपदस्यैवायमर्थोऽव्याप्तेर्वोध्यपादेन खंज इत्यादावपि वैशिष्ट्यमर्थः
पादवत्वे सति तादृशसं[?]स्थानवत्पादद्वयशून्य इत्यर्थः । केचित्तु काणत्वं प्रकृतेन चक्षुः शून्य

का·वा·
११

शून्यवत्वंअक्ष्णोतिअत्रअक्षिपदंगोलकपरं।अभेदेत्तृतीयागोलकाभिन्नचक्षुःशून्यवानित्यर्थः॥
अतएवयेनांगविकारइतिसूत्रं॥येनांगेनविरोहानिस्तदंगवाचकात्तृतीयेत्यर्थः॥संगच्छतेयस्य
गोलकमपिनाशितत्राक्ष्णाकाणइतिप्रयोगोभाक्तइत्याहुःपूर्वोपकल्पितेतुयेनांगविकार
सज्जातीयवाचकात्तृतीयेत्यर्थः॥मुखेनत्रिलोचनइत्यत्रापिवैशिष्ट्यंतृतीयार्थः॥बहुव्रीह्य
र्थस्यलोचनत्रयवानित्यस्यघटकेएकदेशेलोचनत्रयेआकांक्षावैशिष्ट्यादन्वेतिमुखवृत्ति
लोचनत्रयवानित्यर्थः॥बहुव्रीहेरेवमुखवृत्तिलोचनत्रयवत्तिलक्षणामुखेनेतितात्पर्यग्रा
हकमित्याहुः॥चैत्रोमैत्रान्मासेनपूर्वइत्यत्रप्रागभावावच्छिन्नकालसंबंधिपरतृतीया
भेदःपंचम्यर्थोऽनुयोगितामासाभिन्नमैत्रानुयोगिप्रागभावावच्छिन्नसमयसंबंधीचैत्रइ हरः
११

त्पन्न इत्यर्थः ॥ सेवं घटितत्वमत्र व्यापकत्वेनैतेन दिनेन पूर्वजे मासेन पूर्वज इति न योगः ॥ चैत्रो मैत्रान्मासे
नावर इत्यत्रापि अवरपदं प्रागभावानधिकरणकालध्वंसाधिकरणक्षणोत्पत्तिकपरपंचम्य
र्थेनुयोगित्वात्तृतीयाभेदः ॥ मासाभिन्नो यो मैत्रप्रागभावानधिकरणकालध्वंसाधिकरणक्ष
णोत्पत्तिकश्चैत्र इत्यर्थः ॥ पुण्येन हीन इत्यत्रानुयोगित्वं तृतीयार्थः अन्यत्राभाववान्हीनपदार्थः ।
एकदेशेनुयोगित्वान्वयः अत्र नञ्वद्व्युत्पत्तिरनुसंधेया धनेन कुलमित्यादौ हेतुत्वं तृतीया
र्थः ॥ कर्तृकरणयोरिति सूत्रे ॥ कर्तृत्वबोधकतृतीयाया विध्यात्मके ॥ हेताविति तु हेतुत्वसा
मान्यबोधकतृतीयाया इति भेदः ॥ तृतीया जन्यकरणबोधे धातुजन्योपस्थितेर्हेतुः ॥ तेन दण्डे
न घट इति करणत्वतात्पर्येण प्रयोगः ॥ हेतुतामादाय तु दण्डेन घट इतीष्यत एव धनेन कुल

मितिवत्॥केचित्तु॥क्रियासाकांक्षतृतीयायाहेतुत्वेतिनामार्थान्वितत्तृतीयायाविधायकमिति
भेदइत्याहुः॥पुत्रेणसहागतइत्यत्रागतक्रियासमभिव्याहृतंसहपदं॥आगमनसमानका
लीनत्वेसत्यागमनसमानदेशीयत्वंबोधयति॥पुत्रेणेतितृतीयार्थेकर्तृत्वेसहार्थेआगमनेऽ
न्वेतितथाचपुत्रकर्तृकागमनसमानकालीनसमानदेशीयागमनकर्ताचैत्रइतिबोधः॥एवं
पुत्रेणसहागच्छतीत्यादावपिबोध्यं॥धान्येनधनीगोत्रेणगार्ग्यइत्यादावभेदार्थः॥प्रकृत्याअ
भिरूपइत्यत्रप्रकृतिपदंस्वाभाविकपरं॥अभेदेतृतीयाअभिरूपपदंसौंदर्यादिमत्परंत्वंस्वा
भाविकाभिन्नसौंदर्यादिमानितिधीः॥कर्मणायमभिप्रैतिससंप्रदानमितिपाणिनिसूत्रं॥तत्क्रि
याकरणीभूतेनतत्क्रियाकर्माकर्तायमभिप्रैतितत्क्रियायांसंप्रदानमितितदर्थः॥विप्रायधनं

ददातीत्यादौ धनं दानकरणं परस्वत्वहेतुदानस्य घटकं यत्सत्वं तद्धेतुत्वादतो लक्षणा संगतिः ॥ग्रा
मं गच्छतीत्यादौ कर्मीभूतग्रामजन्यसुखादिभागित्वेनोद्देश्यस्य चैत्रादेर्वारणाय करणीभूतेति
॥ग्रामस्य तत्र न करणीविप्राय धनं ददातीत्यत्र चतुर्थ्यर्थस्य विप्रस्वत्वोद्देश्यकत्वं तदिच्छाजन्य
त्वरूपदाने अन्वेति द्वितीयार्थः ॥स्वत्वं विप्रस्वत्वोद्देश्यधनीयस्वत्वजनकदानानुकूलकृतिमा
निति वाक्यार्थः ॥अत एव पितुः स्वर्गादिकमुद्दिश्य दत्ते धने पित्रे धनं ददातीति न प्रयोगः पि
तुः स्वत्वस्यानुद्देश्यत्वात् ॥न च धनकरणत्वादेव मानाद्युक्तं संप्रदानत्वं ॥चतुर्थ्या न बोधितम
तः संप्रदानचतुर्थीत्यस्यानुपपत्तिः ॥संप्रदाने चतुर्थीत्यस्य यदीयस्वत्वमभिप्रेतं तत्र चतुर्थी

का·वा·
१२
13

त्यर्थात् उक्तसंबन्धानन्वयमानसादि दोषः ॥ पाक्षिकः ॥ न कर्मणि द्वितीयेति धात्वर्थतावच्छेदकफल
शालित्वादिकमपि सावधी विषयो वृक्षायोदकं सिंचतीत्यत्र संबंधित्वेनेच्छाविषयत्वं चतुर्थ्य
र्थः सेकघटकक्रियायामन्वेति संयोगेन तदन्वय इत्यन्ये सेकत्वस्य संयोगानुकूलद्रवद्रव्यक्रियानुकू
लो व्यापारः ॥ तत्र यद्यपि साक्षाद्वृक्षसमुद्देश्यत्वान्नासि तथापि तत्संयोजन्यसंयोगादावसी
तिन दोषः ॥ द्वितीयार्थवृत्तिद्रवद्रव्यक्रियायामन्वेति । तथा च वृक्षवृत्तित्वेनेच्छाविषयीभूता ।
उदकवृत्तिर्या संयोगानुकूलद्रवद्रव्यक्रियानुकूलो व्यापारस्तद्विषयककृतिमानिति वा
क्यार्थः ॥ संयोगस्य द्वितीयार्थवृत्तेश्चतुर्थ्यर्थस्य वान्वय इत्यपरे ॥ पयसा वृक्षं सिंचतीत्य

हरा
१२

त्रहेतुत्वंवृत्तिरेवतृतीयार्थःसंयोगोद्वितीयार्थः॥तथाच॥वृक्षवृत्तिसंयोगजनिकायापयोवृत्तिद्र
वद्रव्यक्रियातद्वत्वेनकुड्यो व्यापारः॥तद्विषयककृतिमानितिवाक्यार्थः॥वृत्तिद्वितीयार्थो धा
त्वर्थेसंयोगेन्वेतीत्यन्ये ननु धात्वर्थसाक्षात्प्रकारीभूतफलवत्त्वमेव कर्मत्वं अन्यथा वह्निं
जुहोतीतिस्यादितिप्रागुक्तं तथा च कथं वृक्षस्य सेककर्मत्वमिति चेन्न॥ परंपरयाधात्वर्थ
प्रकारीभूतफलवत्त्वोपि कर्मत्वात् अजां ग्रामं नयतीत्यादौ ग्रामादेः कर्मतानस्यात् तर्हि व
ह्निंजुहोतीतिस्यात् होमार्थकजुहोतिसमभिव्याहृतद्वितीयायावह्निसंयोगाकुलक्रियावि
शेष्यककर्मत्वप्रकारकबोधत्वावच्छिन्नेहेतुत्वात् जुहोति समभिव्याहृतकर्मत्वप्रकार

कत्वबोधेविशेष्यतयाऽनुहोमिजन्यतादृशक्रियोपस्थितेर्हेतुत्वमित्यन्ये॥वस्तुतोवृक्षायेत्या
दौवृक्षंसंप्रदानत्वमेवकर्मजन्यफलभागित्वेनोद्देश्यत्वात्॥उदकजन्यफलपत्रपुष्पादि
भागित्वेनोद्देश्यत्वंचतुर्थ्यर्थः॥वृक्षीयपत्रपुष्पेकस्यसेचनविषयककृतिमानितिवाक्या
र्थः॥अतएवघटायोन्मीलितचक्षुरित्यादौघटसाक्षात्कारोद्देश्यकत्वमुन्मीलनेभासते
मित्रायदूतंप्रेषयतीत्यादावपिदूतजन्यवार्तादिभागित्वेनोद्देश्यत्वंचतुर्थ्यर्थः॥केचित्तु
मित्रपदंवार्तापरंप्रयोजकत्वंचतुर्थ्यर्थः।प्रेरणान्वेतीत्यन्ये।नत्वजांग्रामंनयतीतिवत्
वृक्षमुदकंसिंचतीतिस्यात्संयोगवत्तयावृक्षस्यद्रवद्रव्यक्रियावत्तयाउदकस्यक

र्त्वंसंभवादितिचेन्न। पूर्वप्रयोगेनतत्पात्रयोगादितिकेचित्। अन्येनुसंयोगानुकूलद्रवद्रव्यक्रियैव
सिंचतीत्यर्थः॥ वृक्षायोदकंसिंचतीत्यत्रद्वितीयातृतीययोर्हि निरर्थः॥ द्वितीयार्थसंयोगेतृतीया
र्थक्रियायामन्वयति। वृक्षवृत्तिसंयोगहेतुर्द्रवद्रव्यक्षक्रियायाउदकवृत्तिस्तद्विषयककृतिमा
नितिवाक्यार्थः॥ अत्रवृक्षमुदकंसिंचतीतिनप्रयोगइत्याहुः॥ नवाजांग्रामंनयतीति अत्रअ
जारूपकर्मजन्यफलभागित्वेनग्रामस्येष्टत्वात्॥ नस्यसंप्रदानत्वापत्तिः॥ यत्रग्रामीयफलो
द्देश्यकत्वमानेनतात्पर्यंतत्रग्रामायाजांनयतीत्यत्रोपपन्ने अत्रतात्पर्याभावादेवनतत्पात्र
योगः॥ यद्वादेयनिष्ठस्वत्वभागित्वेनोद्देश्यत्वंकर्मणोतिरिक्तस्यकर्मणीत्यर्थः॥ देवपित्रा

का॰वा
१५
15

देः स्वत्वभागित्वेनोद्देश्यत्वमतो नमः स्वस्तीत्यादि सूत्रांतरेण चतुर्थी विहिता॥ रजकस्य वस्त्रं द
दातीत्यादौ रजको न स्वत्वभागित्वेनोद्देश्य इति चतुर्थी॥ कथं तर्हि विस्रवे वस्त्रं ददातीत्यादि स्वत्व
भागित्वेनोद्देश्यत्वविवक्षाभिप्राये सति तथा प्रयोगात्॥ दानजन्यस्वत्वहेतुस्वीकारवत्वं तच्च नपि
तृदेवतादीनां॥ किंतु॥ तत्रोद्देश्यत्वमेव चतुर्थ्यर्थः इत्याहुः॥ गंधः शिवाय नमः॥ इत्यादौ उद्दे
श्यत्वं चतुर्थ्यर्थः त्यागो नमः शब्दार्थः देरर्थः॥ शिवोद्देश्यकत्यागविषयो गंध इति वाक्यार्थः॥ स्व
वमग्नये स्वाहेत्यादौ वौषट्॥ शत्रवे शरं क्षिपतीत्यादौ शत्रोः संप्राप्तत्वगोचरां शरजन्यशत्रुवृ
त्तिदुःखोद्देश्यकत्वं चतुर्थ्यर्थः॥ वृक्षायेत्यादौ सिंचदानशब्दो गौणः कर्मजन्यफलभागित्वेनो
द्देश्यत्वं॥ तथा चोदकजन्यपत्रपुष्पादिभागित्वेनोद्देश्यत्वं चतुर्थ्यर्थः सेकेन्वेति॥ अनयादि

हरः
१५

शाघह्नयोर्मिलितंवद्गुरित्यादौबोध्यौ॥एवंमित्रायहृतंप्रेषयतीत्यादावपिगोरगाद्यसंप्रदान
शब्दः॥केचित्तुशत्रवेइत्यादौशत्रुपदंदोषपरंचतुर्थ्यर्थः॥पक्षेअन्वेतीत्याहुः॥वल्मीकायश
रंक्षिपतीत्यादौशरक्षेपसंयोगोद्देश्यकत्वमेव॥नवस्त्रेत्रीतिमुद्दिश्यपोत्रायदन्नेददामी
तिस्यात्॥दृष्टत्वात्॥चैत्रायरोचतेमोदकइत्यत्ररुचिवचतुर्थ्या अर्थः॥चैत्रवृत्तिरुचिविषयो
मोदकइत्यर्थः॥मह्यंशतंधारयतीत्यादौधृधातुयोगेचतुर्थीसंबंधित्वमेवाह॥मत्तोवधि
मर्णोश्रयइतिवाक्यार्थः॥ऋणीवधनदेयत्वेनस्वीकृत्यग्रहणं॥यूपायदार्वित्यादौदारुप
दंतत्स्वयवपरंजनकत्वंचतुर्थ्यर्थः॥यूपजनकोदार्ववयवइत्यर्थः॥ध्रुवमपायेपादानमि
तिसूत्रं॥अपायेअगमोविहगावच्छिन्नेक्रियायांध्रुवंअवधिभूतंविशेषणोवधित्वात्॥

विशिष्टावधित्वे यद्यपि विभागावधित्वं वृक्षपर्णयोरप्यस्ति ॥ तथापि विभागविशिष्टक्रियावधि
त्वं स्वभिन्नक्रियाजन्यो विभागाश्रयत्वमपादानत्वमिति फलितं । पर्णादेरपि विभागाश्रयत्वात्तु स्व
भिन्नेति पंचम्या ४ स्वभिन्नसमवेतत्वं विभागजनकत्वे संबंधेन विभागः पतनेन्वेति ॥ वृक्षात्पर्णं प
ततीत्यस्य वृक्षस्थवृत्तिविभागजनकवृक्षवृत्तिविभागजनकवृक्षभिन्नसमवेतपतनाश्रय ॥
पर्णमित्यर्थः ॥ एवं ग्रामादागतो वेत्यादौ ग्रामवृत्तिविभागजनकेत्यादिरीत्यान्वयो बोध्यं यद्य
ध्रुवं निश्चलं तथा च ॥ तत्क्रियाश्रयत्वे सति तत्क्रियाजन्यविभागाश्रयत्वं तत्त्वं पर्णादिमत्यंतं ॥
धावतोश्वात्पतितः इत्यादावश्वस्य क्रियावत्वेपि तत्क्रियाश्रयत्वान्न दोषः नव वृक्षात्त्यजती
ति स्यात् पंचमीजन्यापादानत्वकर्मकधातुजन्योपस्थितेर्हेतुत्वात् ॥ नव वृक्षं त्यजतीत्यत्रा

प्यपादानत्वंस्यात्। वृक्षेपादानस्येष्टत्वात्। अतएवतामेवपर्णव्यक्तिमादायवृक्षात्पर्णंपत
तीतिप्रयोगः॥ वृक्षात्त्यजतीतिप्रयोग॰स्यादितिचेत् पंचमीजन्यापादानत्वबोधेत्यजिप्रभृति
भिन्नधातुजन्योपस्थितेर्हेतुत्वस्याभ्यमगत्याकल्पनात्॥ वृक्षाद्विभजत इत्यत्रावधित्वंवार्थः॥
तत्रवृक्षमेदावच्छिन्नस्वरूपसंबंधेनान्वेति। तेनस्वस्माद्विभजत इतिनयोगः॥ कूपादंधंनिवा
रयतीत्यत्रद्वितीयार्थोवृत्तिःपंचम्यर्थपतनंप्रतिबंधप्रयोजकव्यापारोधात्वर्थः॥ अंधवृत्ति
कूपपतनप्रतिबंधकव्यापारानुकूलकृतिमानितिवाक्यार्थः॥ एवंसविषादन्नान्मित्रंवावय
तीति अत्रभोजनंपंचम्यर्थः॥ यत्रकूपेपतनंप्रसिद्धंतत्रायंप्रयोगोसाधुरित्येके॥ वस्तुतः॰

पतनाभावप्रकारेच्छापूर्वकपतनानुकूलो व्यापारः॥ कूपपतेवारत्वं पंचम्यर्थः॥ कर्मत्वं द्वितीयार्थ
ः कर्तृत्वं पतनविशेष्यताविरूपितप्रकारतासंबंधेन इच्छायामन्वेति॥ कूपपतनादेः कश्चिद्
प्रसिद्धे पिताहश्येच्छासत्वान्न दोषः कूपकर्मत्वेनांधकर्तृकत्वेन पापतनाभावेच्छा तत्पूर्वकप
तनानुकूलो व्यापारस्तद्विषयककृतिमानिति वाक्यार्थः॥ सविषादन्नामित्रं वावयतीत्या
दौ भोजनाभावेच्छापूर्वभोजनानुकूलो व्यापारो वारत्वं पंचम्यर्थः कर्मता द्वितीयार्थः कर्तृत्व
मन्यपूर्ववत् द्वितीयार्थः प्रतियोगित्वं पंचम्यर्थो वृत्तिधात्वर्थो भावानुकूलो व्यापारः। तथाच॥
पतनसंबंधेन कूपकूपवृत्त्यंधप्रतियोगिकाभावानुकूलव्यापारः प्रसिद्धः॥ केचित्तु॥ पंचम्य

थोवृत्तिर्द्वितीयार्थःकर्तृत्वंद्वितीयंचधात्वर्थःपतनमपावस्थ॥तथाच॥पतननिष्ठकूपवृत्तित्वाधः
कर्तृत्वोभयाभावानुकूलव्यापारवानित्यर्थः॥इत्याहुः॥तन्न॥द्वित्वस्यसुवर्थस्यसुवर्थान्तरे
अन्वयस्याव्युत्पत्तेःअन्यथापाकात्तण्डुलमितिवाक्यात्॥पाकजन्यतण्डुलनिष्ठंफलमिति
बोधापत्तेः॥यत्रचवाच्यमानंबाधःकूपेपतितःतत्रकूपादंधंवारयतीतिप्रयोगेनापत्तिः॥
हिमवतोगंगाप्रभवतीत्यत्रप्रवहनंवहिःसंयोगोवहिःपदार्थोहिमवद्भिन्नेयंबुद्धिमियतीभू
रेवसंयोगध्वंसकालीनत्वंपंचम्यर्थवहिःसंगत्वव्यापकविशेषणतासंबंधेनवहिःसंयो
गेन्वेति॥आश्रयत्वमाख्यातार्थः॥हिमवत्संयोगध्वंसकालीनवहिःसंयोगाश्रयोगंगाबोधः॥
प्रयागात्गंगाप्रवभतीत्यत्रप्रयागाद्वहिःसंयोगत्वव्यापकसंबंधेन्वतो॥केचित्तु॥मादृशाप्रयो

गवाक्षाद्यपंचम्याः ८ प्रायमिकवहिः ८ संयोगार्थबोधकत्वं संयोगध्वंसाव्यवहितोत्तरवर्त्तित्वं ॥ हिमव
त्संयोगध्वंसाव्यवहितोत्तरहृत्तिर्वा हि ८ संयोगाश्रयो गंगेति बोध ८ इत्याहुः ॥ हिमवतो जायते गंगेति
तदर्थ इति केचित् ॥ तन्न ॥ तथा सति हेत्वर्थपंचम्यैवोपपत्तौ भुवः ८ प्रभव इति सूत्रवैयर्थ्यापत्तेः ॥ पू
र्वोक्तरीत्या वल्मीकाग्रात्प्रभवति धनुः ८ खण्डमाखण्डलस्येत्यत्रापि बोधः ॥ तत्र वल्मीकाग्रो
द्देशो वहिः ८ प्रदार्थः ॥ वृक्षाद्भयमित्यत्र पंचम्यर्थो जन्यत्वं शत्रोः ८ परित्रायत इत्यत्र पारित्राणे भ
याभावः ॥ पंचम्यर्थो जन्यत्वं भयेऽन्वेति ॥ शत्रुजन्यभयाभावानुकूलव्यापारवानित्यर्थः ॥ चौरा
द्धनमादत्ते इत्यत्र यथेष्टविनियोगविषयत्वं पंचम्यर्थो धनेऽन्वेति ॥ ननु स्वत्वं चौरस्वत्वाभावादि
त्येके ॥ यथेष्टविनियोगविरोधित्वं पंचम्यर्थ आदानेऽन्वेतीत्यन्ये ॥ अर्जुनात्कुरोः ८ पराजते इत्यत्रा

त्या

सहितादिषरूपा धात्वर्थः पंचम्यर्थो विषयत्वं अर्जुनो न सहत इति विवरणात्॥ अधर्माज्जुगुप्स
त इत्यत्र विषयत्वं पंचम्यर्थः निंदा धात्वर्थः॥ अधर्माद्विरमतीत्यत्र पंचम्यर्थो विषयत्वं धात्वर्थः क
रणानंतरं यावज्जीवमकरणं॥ पंचम्यर्थे करणे अकरणे वान्वेति॥ अधर्मविषयजुगुप्सोत्पु
त्तरकालावच्छिन्नयावज्जीवधर्मविषयकृत्यभाववानित्यर्थः॥ यावज्जीवपदाव धार्मिकस्व
त्वादिदशायां अधर्माद्विरमज्जीवनमिति न प्रयोगः॥ येन तु किंचित्कालं विरम्य पुनः कृतं त्त्रवि
रमतीति प्रयोगो याक्तः॥ धर्मात्प्रमाद्यतीत्यत्र विषयत्वं पंचम्यर्थ धातोरज्ञानमाश्रयत्वमाख्या
तार्थः॥ धर्मविषयज्ञानाभावाश्रय इति बोधः॥ उपाध्यायाद् अंतर्हित इत्यत्र पंचम्यासंबंधित्वं स्वत्र
त्यक्षविरोधिव्यापारो धात्वर्थः॥ अधिकरणत्वं सामान्यतो धर्मसंबंधित्वं विशेषतु तत्तदूरलात्स

त्वेतन्न दण्डपतनप्रतिबंधकसंयोगित्वं केचित् कचित् दण्डसमवायिकत्वादिकं एवमन्यत्रापीति
प्रपंचः॥ तन्न॥ धर्मस्याधेयरूपस्याननुगमात्॥ आधेयत्वमनुगतं॥ पदार्थांतरमिति वेदाधा
रत्वमप्यतिरिक्तमस्तु तन्निरूपकत्वमेवाधेयत्वमित्येव किं न स्यात् तस्माद्द्वयमप्यतिरिक्तं॥
विशेषलक्षणमप्यालोकाद्याधारे गृहादावव्याप्तं॥ आलोकपतनाद्यप्रसिद्धेः॥ न चानेक
संयोगित्वमेव तदाकाशादिवतेव्याप्तिः॥ तद्वत्तत्व संयोगस्याप्यननुगमात् दण्डा
धार इत्युक्तेन दण्डसंयोगीन वेति संयोगाभावप्रसंगाच्चेति नमतं तत्संयोगसमवायादिरे
वाधेयताआधारतात्वमखण्डतत्साधारणं तद्गेहेपि संयोगित्वादिनासंबंधायोनानुपपन्नइ
ति प्राचीनानुयायिनः॥ भूतले घट इत्यादौ आधारत्वं वा सप्तम्यर्थः॥ गृहे पचतीत्यत्र कर्तृक

४०
भा॰श॰

र्मान्यतमघटितसंबंधेन क्रियाश्रयत्वं कर्मघटितसंबंधेन वा तदाश्रयत्वं सप्तम्यर्थः॥ अतएव
पीडयत्वतीति न प्रयोगः॥ चर्मणि द्वीपिनं हन्तीत्यत्र चर्मपदं चर्मयथेष्टविनियोगपरं निमि
त्तात्सप्तमीत्यत्र निमित्तत्वं च स्वेतनिमित्तत्र प्रवृत्तिहेतुज्ञानविषयः प्रवृत्तिकरमिति यावत्॥ त
थाचान्यत्वं जनकत्वं वा सप्तम्यर्थः॥ चर्मयथेष्टविनियोगजनकद्वीपिहननानुकूलकृ
तिमानित्यर्थः॥ निमित्तत्वं यथेष्टविनियोगवत्त्वेनेच्छाविषयत्वं॥ तथा च तादृशेच्छा सप्त
म्यर्थो जन्यत्वसंबंधेन हनने न्वेतीत्यन्ये॥ सीम्नि पुष्कलको हत इत्यत्र च मणीत्यत्रेव बो
धः॥ परं त्वत्र सीमा अण्डकोशः पुष्कलको गन्धमृग इति सीमा घट्टस्थितिक्षेत्रे घाण्डको
ष्वपि च स्त्रियां॥ अथ पुष्कलको गन्धमृगे क्षेपककीलयोरिति च॥ अत्र निमित्तात्कर्मसं

योगइत्यत्र शासनबलात्। किंचित्कर्मान्वितक्रियाबोधकसमभिव्याहारोप्यपेक्षितो न तु सकर्मक
धातुसमभिव्याहार एव॥ अत एव रजनीक्षयेप्युदेतीति प्रयोगः। उदयगिरिमारोहतीति तदर्था
त्॥ शरदि पुष्यंति सप्तछदा इत्यत्र जनकत्वं जन्यत्वं वा सप्तम्यर्थः॥ सप्तछदपुष्पत्वावच्छिन्न
विशेषणता संसर्गेणापुष्यन्वेति॥ शरत्कालत्वावच्छिन्नकारणतानिरूपिता वा॥ सप्तछद
पुष्पत्वावच्छिन्नजन्यतामेव वा सप्तम्यर्थः॥ तेन शरदि पुष्यंति पद्मिन्य इत्यादिर्न प्रयोगः
॥ तासामन्यदापि पुष्पवत्वात् तेन रूपेण तज्जाहेतुत्वाज्ञडत्यत्तिरेव सप्तम्यर्थः॥ सप्तछद
पुष्पत्वावच्छिन्नविशेषणतया पुष्येषु तदन्वयः। पुष्पपदं सप्तछदपुष्पवदित्याऊः। स
ति सप्तम्याः सामानाधिकरण्यार्थः। तच्च कालिकदैशिकभेदेन द्विधा। गोषु दुह्यमानासु आगत

का० का०
२१

२१

इत्यत्र किंचिलिकं दुह्यमानत्वविशिष्टगोकालीनत्वस्यागमने भावनात् दुग्धा सुगन इत्यत्र दोह
नध्वंसविशिष्टस्य प्रत्ययेन बोधयति ॥ यथाश्रुतं तु ॥ अतीतदोहकालीनत्वस्यागमने बोधा
त् ॥ देशिकं नु गुणान्यत्वे सति सत्वादिरादौ बोध्यं ॥ यद्यपि यत्र पापदं धर्मपदं सामान्यव
त्वे सति प्रत्ययगुणत्वादिति प्रयोगानुबोधादिति ज्ञेयं ॥ ॥ इति श्रीरुद्रभट्टाचार्यविरचित
कारकपरिच्छेदः समाप्तः ॥ ॥ ॥ ॥ मदृष्टमिदं मधुसुशीलाप्त ७१३ युक्ते शके माघ
वे मासि पक्षे वलक्षे ॥ तिथौ मात्स्यके तोक्ष पापालवारे सुधानंदनामालिखद्रूपभट्ट ॥ ॥
ह्रस्वदीर्घपरीक्षायां मम बुद्धिः पलायिता ॥ शुद्धाशुद्धपरिज्ञाने कथं शक्तिर्भविष्यति ॥ २ ॥

हरः
२१

१७२